श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्र कृतिषु

# ॥ श्रीलक्ष्मीहयग्रीवप्राबोधिकस्तुतिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीहयग्रीवप्राबोधिकस्तुतिः ॥

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम्।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे॥ १ ॥

विशुद्धविज्ञानघनस्वरूपं विज्ञानविश्राणनबद्धदीक्षम्।
दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये॥ २ ॥

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम्॥ ३ ॥

वीर सौम्य विबुध्यस्व कौसल्यानन्दवर्धन।
जगद्धिसर्वं स्वपिति त्वयि सुप्ते नरोत्तम॥ ४ ॥

यामिन्यपैति यदुनायक मुञ्च निद्रा-
मुन्मेषमृच्छति नवोन्मिषितेन विश्वम्।
जातस्स्वयं खलु जगद्धितमेव कर्तुं
धर्मप्रवर्तनधिया धरणीतलेऽस्मिन्॥ ५ ॥

सुखाय सुप्रातमिदं तवास्तु जगत्पते जागृहि नन्दसूनो।
अम्भोजमन्तश्शयमञ्जुतारारोलम्बमुन्मीलतु लोचनं ते॥ ६ ॥

——— ********** ———

करुणावरुणालयाम्बुजश्रीस्फुरणाहंकृतिहारिलोचनश्रीः।
चरणाब्जनतार्तिभारहारिंस्तव भूयात्तुरगास्य सुप्रभातम्॥ १ ॥

पुरःप्रबुद्धाम्बुधिराजकन्यामुखाब्जनिश्वासमिवानुकुर्वन्।
मरुत्सुगन्धिः प्रतिवाति मन्दं हयाननस्तात्तव सुप्रभातम्॥ २ ॥

www.prapatti.com

त्वद्दीप्त्या प्रविमलया जितः किलासावाहोस्वित्तव दयितामुखाम्बुजेन।
पाश्चात्ये पतति पयोनिधौ सुधांशुर्भूयात्ते सपदि हयास्य सुप्रभातम्॥ ३॥

वरदानकृतिन् स्मरदार्ततरद्विरदाघहृतिस्फुरदादरण।
इति सन्मतयो यतयः प्रवदन्त्यधुना मधुनाशन जागृहि भोः॥ ४॥

समर्चने ते कृतकौतुकेन सज्जीकृतं शोणमणीन्द्रपीठम्।
हंसेन किं सान्ध्यमहो विभाति हयास्य भूयात्तव सुप्रभातम्॥ ५॥

हरिर्हरिर्हरिरिति मञ्जुभाषितं द्विजावळेस्सपदि निशम्य कौतुकात्।
द्विजव्रजोऽप्यनुवदतीव कूजितैर्हयाननानघगुण जागृहि प्रभो॥ ६॥

प्राचीं वधूं सपदि मित्रकरग्रहार्थं सन्ध्यावधूस्स्वरुचिकुङ्कुमपङ्कसान्द्रैः।
प्रालेयमङ्गलजलैरभिषिञ्चतीव श्रीमन् हयास्य भवतात्तव सुप्रभातम्॥ ७॥

कुमुदवनं विमुच्य नवपङ्कजषण्डमिमाः।
सपदि समाश्रयन्ति मुदिता भ्रमरावळयः।
भुवि निखिलोऽपि चाश्रयति सश्रियमेव जनो
हयवदनाद्य जागृहि हरे करुणैकनिधे॥ ८॥

फुल्लत्पङ्कजरत्नपात्रनिवहानासाद्य हृद्यश्रियः
सौगन्ध्याढ्यमरन्ददिव्यसलिलैरापूरितानादरात्।
हंसास्त्वामिव पूजयन्ति विरुतव्याजात्पठन्तो मनून्
सुस्नातास्सरसीषु वाहमुख ते सुप्रातरस्तु प्रभो॥ ९॥

उच्चलन्मधुकरौघमञ्जुलं पद्ममुल्लसति पूजनाय ते।
धूपपात्रमिव हंससज्जितं सुप्रभातमिह ते हयानन॥ १०॥

इन्दीवराणामिव कान्तिरद्य मन्दीभवन्ती व्यपयातु निद्रा।
फुल्लत्विदं पद्ममिवाक्षियुग्मं हयास्य ते संप्रति सुप्रभातम्॥ ११॥

एते वेत्रहतित्रुटत्पटुमहाकोटीरकोटीमणि-
श्रेणीभिस्तव मन्दिरस्य ददतो द्वाराय नीराजनम्।

काङ्क्षन्ति प्रतिबोधकालमिह ते सर्वेऽपि लोकाधिपाः
तानेतान् करुणावलोकनलवैर्धन्यान्विधेहि प्रभो॥ १२॥

अक्षीणे मयि तिष्ठ किं विहरसे संक्षीयमाणे मुहु-
र्बिम्बेऽस्मिन्निति देवदेव नितरां त्वत्प्रार्थनायागतम्।
चान्द्रंबिम्बमिदं वदन्ति हि परं मोदार्पणं दर्पणं
दृष्टिं न्यस्य कृपानिधेऽत्र भगवन् प्राबोधिकीं श्रीपते॥ १३॥

निद्राशेषकषायितैस्सुललितैरुद्यद्दयाप्यायितै-
र्दिव्यापाङ्गझरैस्त्वदर्चनकृते द्वार्यत्र बद्धाञ्जलीन्।
आचार्यान्निगमान्तदेशिकमुखानाधत्स्व सुस्नापितान्
सुप्रातं तुरगास्य तेऽस्तु करुणासिन्धो दिनं श्रीपते॥ १४॥

इदं कुम्भद्वन्द्वं घुसृणमसृणस्मेरसलिलं
प्रतीहारे लक्ष्मीस्तनयुगमनोहारि लसति।
इयं गौस्सद्वत्सा परिजनसमूहोऽपि निभृतो
दिनं सुप्रातं ते भवतु करुणाब्धे हयमुख॥ १५॥

रविमण्डलीमिदानीमुदयमहीभृत्तवाभिषेकार्थम्।
कनककलशीमिव वहत्यस्तु हयग्रीव सुप्रभातं ते॥ १६॥

अनुचित इव सेवने त्वदीये प्रमदभरादिह पञ्चमं विहाय।
विदधति किल वैणिकाश्च गानं हयवदनाद्य तवास्तु सुप्रभातम्॥ १७॥

पिकनिकरमदविधूननगानमनोहरमुदारसुकुमारम्।
धन्यं कन्याद्वन्द्वं त्वां नीराजयति जागृहि हयास्य॥ १८॥

काहळडिण्डिममण्डलमर्दलपणवाद्यहृद्यवाद्यानाम्।
संस्पर्ध एव निनदा जृंभन्ते तुरगवदन बुध्यस्व॥ १९॥

तव तनुरुचिसाधर्म्यात्संहृष्टे नर्तनं किलातनुतः।
द्वारभुवि चामरे द्वे हयवदन तवास्तु सुप्रभातमिह॥ २०॥

त्वत्पादाम्भोजयुग्मं परिचरितुमना मूर्ध्नि बद्धाञ्जलिस्सन्
श्रीकृष्णब्रह्मतन्त्राग्रिमपदकलिजित्संयमी त्वां स्तवीति।
त्वत्सेवायै समुद्यन्निरवधिकमहानन्दथुस्तिष्ठतीह
श्रीमान्कृष्णावनीन्द्रो हयवदन तव श्रीश सुप्रातरस्तु॥ २१ ॥

जय जय नित्यसूक्तिललनामणिमौळिमणे
जय जय भक्तसंहतिभवाब्धिमहातरणे।
जय जय वेदमौळिगुरुभाग्यदयाजलधे
जय जय वाजिवक्त्र परकालयतीन्द्रनिधे॥ २२ ॥

॥ इति श्रीलक्ष्मीहयग्रीवप्राबोधिकस्तुतिः समाप्ता ॥

www.prapatti.com